संस्कारादिकरणम् । मन्त्रोच्चारपूर्व्वके यागादिषु संस्कारभेदे "प्रयाजानुमन्त्रणमिति" कात्या० ३,३,२ ।

**अनुमरण** न० अनु+मृ–ल्युट् । भर्त्तरि मृते तद्देहाप्राप्तौ तत्पादुकादिग्रहणेन पृथक्चितारोहणेन स्त्रीणां देहत्यागे । "भर्त्रनुमरणं काले याः कुर्व्वन्ति तथाविधाः । कामात् क्रोधात् भयाद्वापि सर्वाः पूताः भवन्ति ताः" इति स्मृतिः अनुपूर्व्वकमरणस्य मरणसदृशमरणार्थकत्वेन सकर्म्मकत्वम् अतएव "भवता नानुमृतापि लभ्यते" इति रघौ कर्मणि क्तप्रयोगः । अनुमरणं च भर्त्तुः देशान्तरादिमरणे देहाद्यलाभे एव "देशान्तरे मृते पत्यौ साध्वी तत्पादुकाद्वयम् । निधायोरसि संशुद्धा प्रविशेज्जातवेदसमिति" स्मृतिः । तत्र क्षत्रियादीनामेवाधिकारो न विप्रायाः, यथोक्तम् । "पृथक्चितां समारुह्य न विप्रा गन्तुमर्हतीति" शु०त०स्मृतौ ।

**अनुमा** स्त्री अनु+मा–अङ् । परामर्शज्ञानाधीने (व्याप्तधूमादिलिङ्गविशिष्टज्ञानाधीने) ज्ञानभेदे यथा "पर्वतो वह्निमानित्यादि" तथाहि धूमादिहेतौ महानसादौ प्राक् भूयःसहचारदर्शनात् धूमत्ववह्नित्वसामान्यधर्म्मेण सकलवह्निधूमादिव्याप्तिनिश्चयः अनन्तरं देशान्तरं गतवतो वह्न्यर्थिनः पर्वतादौ धूमदर्शने सति तत्र वह्निव्याप्तिस्मृतिर्जायते एकसम्बन्धिज्ञानस्यापरसम्बन्धिस्मारकताया नियमेन, धूमदर्शनात् धूमगताया वह्नेर्व्याप्तेः स्मरणसम्भवात् । ततस्तादृशधूमवान् अयं पर्वत इति निश्चयरूपपरामर्शेन तत्र वह्निमानयमिति निश्चिनोति सोऽयं निश्चयः अनुमितिरूपः अनुभवभेद इति । तत्र च धूमादिलिङ्गज्ञानमेव करणं नतु ज्ञायमानलिङ्गं करणमिति नव्यनैयायिकसिद्धान्तः प्राचीनमते ज्ञायमानलिङ्गमेवेति भेदः "अनुमायां ज्ञायमानं लिङ्गं तु करणं न हीति" भाषा० । "सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमेति" श०श०प्र० ।

**अनुमातृ** त्रि०अनु+मा–तृच् । अनुमानकर्त्तरि "नहि कश्चित् दृष्टे चौत्कारेण तमनुमिमतेऽनुमातार" इति वाचस्पतिः ।

**अनुमान** न० अनु–मि–मा–वा भावादौ ल्युट् । व्याप्यस्य ज्ञानेन व्यापकस्य निश्चये, यथा वह्निर्धूमस्य व्यापक इति धूमस्तस्य व्याप्य इत्येवं तयोः भूयः सहचारं पाकस्थानादौ दृष्ट्वा पश्चात् पर्वतादौ उद्धूयमानशिखस्य धूमस्य दर्शने तत्र वह्निरस्तीति निश्चीयते । करणे ल्युटि । तद्धेतुभूते धूमादौ । "तज्ज्ञानुमानं त्रिविधमिति" चिन्तामणिः । श्रुतेरेव स्वतः प्रामाण्यं, यत्र श्रुतिः साक्षात् न श्रूयते तत्र स्मृतिवाक्यात् श्रुतिवाक्यमनुमीयते इति श्रुत्यनुमापकं स्मृतिवाक्यमप्यनुमानपदेनाभिधीयते इति मीमांसकाः । "विरोधे त्वनपेक्षमसति ह्यनुमानमिति जै०सू० । इयं स्मृतिः वेदमूलिका आप्तवाक्यत्वादित्येवमनुमानाकारः इति । "दृष्टमनुमानमाप्तवचनञ्च सर्व्वप्रमाणसिद्धत्वादिति सा०का० । "अतीन्द्रियस्य सिद्धिरनुमानादिति" सांख्य०सू० "प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते" इति वाच० "प्रत्यक्षमनुमानं च शास्त्रञ्च विविधागममिति मनुः । "एवमनुमाने निरूपिते तस्मात् पुरुषधौरेयसिद्धिरिति" चिन्ता० "नानुमानं रसादीनामिति सा०द० "सपरिकरमनुमानं निरूप्येति" चिन्तामणिदीधितिः ।

**अनुमानचिन्तामणि** पु० गङ्गेशोपाध्यायकृते न्यायशास्त्रस्यानुमानतत्त्वज्ञापके प्रकरणभेदे । तत्र च आदौ अनुमितिस्वरूपादिनिरूपणं ततस्तत्कारणव्याप्तिज्ञानार्थं व्याप्तिनिरूपणम् ततोव्याप्तिग्रहोपायनिरूपणम् ततो व्याप्तिग्रहानुकूलतर्कनिरूपणम्, उक्तासु बह्वीषु व्याप्तिषु कथङ्कारं तासामनुगमस्तन्निरूपणम्" ततः व्याप्तिज्ञानोपायतया सामान्यलक्षणानिरूपणम् ततो हेतोः परिशुद्धिज्ञानार्थमुपाधिनिरूपणम् । ततोऽनुमित्यङ्गपक्षतानिरूपणम् परार्थानुमानस्य पञ्चावयवन्यायसाध्यतया तन्निरूपणम् । अनुमितौ परामर्शस्य ( साध्यव्याप्तिमद्धेतुविशिष्टज्ञानात्मकस्य ) स्वरूपादिनिरूपणम् ॥ ततोहेतुत्रैविध्यस्य ( केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकित्वरूपस्य ) निरूपणम् ततो वर्ज्जनीयतया हेतोर्दोषाणां ( हेत्वाभासानाम् ) निरूपणम् तत्रादौ सामान्यतोहेत्वाभासलक्षणम् ततः सव्यभिचारस्य, साधारणस्य, असाधारणस्य, अनुपसंहारिणः, असिद्धस्य क्रमशः, ततो बाधस्य निरूपणम् इत्येतत्पर्य्यन्तं सपरिकरमनुमानं हेयतया तद्दोषांश्च निरूप्य तादृशानुमानेन ईश्वरस्य सिद्धिर्दर्शिता तस्याराधनसहकृतेन षोडशपदार्थतत्त्वज्ञानेनात्यन्तिकदुःखनिवृत्तिरूपापवर्गसिद्धिरित्येते पदार्थाः तत्रत्या अवधेयाः ।

**अनुमानदीधिति** स्त्री अनुमानरूपचिन्तामणेर्दीधितिरिव । रघुनाथशिरोमणिकृतायामनुमानचिन्तामणिव्याख्यायाम् ।

**अनुमार्ग** अव्य०मार्गे विभक्त्यर्थे याथार्थ्ये, पश्चादर्थे वा अव्ययी० । मार्गे इत्यर्थे, मार्गानुरूपे, मार्गस्य पश्चादर्थे च । "अनुमार्गागतायाश्चेति" काद० ।

**अनुमाघ** अव्य० माघे विभक्त्यर्थे अव्ययी० । माघे इत्यर्थे । परिमुखा० ञ्य । आनुमाघ्यः तद्भवादौ त्रि० ।

**अनुमास** अव्य० वीप्सार्थे अव्ययी० । प्रतिमासे, अनुमासे